## नवदशः पाठः

# उपायैः सर्वं शक्यम्

संस्कृतसाहित्ये कथासाहित्यं विपुलं वर्तते। तत्र पञ्चतन्त्रम्, कथासरित्सागरः, वेतालपञ्चविंशतिः, विक्रमादित्यकथाः, बृहत्कथामञ्जरी, हितोपदेशः इत्यादयः ग्रन्थाः प्रसिद्धाः सन्ति। तत्र पञ्चतन्त्रे पशुपक्षिप्राणिमाध्यमेन नीतिकथाः प्रस्तुताः सन्ति। प्रस्तुतपाठे कथापात्रे गजश्रृगालौ उपायैः सर्वं शक्यम् इति नीतिं परोक्षरूपेण मनुष्येभ्यः सूचयन्ति।

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म – 'यद्ययं केनाप्युपायेन म्रियते तदा अस्माकम् एतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति'। तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् – 'मया बुद्धिप्रभावादस्य मरणं साधयितव्यम्।' अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्य उवाच – 'देव! दृष्टिप्रसादं कुरु।' हस्ती ब्रूते– 'कस्त्वम्, कुतः समायातः ?'। सोऽवदत् – 'जम्बुकोऽहम्। सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः।' यद्विना राज्ञा अवस्थातुं न युक्तम्, तदात्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः।

यतः –

**यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान्।**
**धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि॥**

अपरञ्च पश्य –

**राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम्।**
**राजन्यसति लोकेऽस्मिन्कुतो भार्या कुतो धनम्॥**

तद्यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमागम्यतां देवेन। इत्युक्त्वोत्थाय चलितः। ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन्महापङ्के निमग्नः। ततस्तेन हस्तिनोक्तम् – 'सखे शृगाल! किमधुना विधेयम्? पङ्के निपतितोऽहं म्रिये। परावृत्य पश्य।' शृगालेन विहस्योक्तम् – 'देव! मम पुच्छकावलम्बनं कृत्वा उत्तिष्ठ। यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तदनुभूयताम् अशरणं दुःखम्।'

तथा चोक्तम् –

**यदाऽसत्सङ्गरहितो भविष्यसि भविष्यसि।**
**यदाऽसज्जनगोष्ठीषु पतिष्यसि पतिष्यसि॥**

ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः। अतोऽहम् ब्रवीमि –

**उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।**
**शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना॥**

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| प्रतिज्ञातम् | – | प्रतिज्ञा की | भुवि | – | पृथ्वी पर |
| वञ्चकः | – | धूर्त / कपटी | विन्देत् | – | प्राप्त करें |
| प्रणम्य | – | प्रणाम करके | सत्वरम् | – | शीघ्र |
| प्रस्थापितः | – | भेजा गया | महापङ्के | – | कीचड़ / दलदल में |
| म्रिये | – | मरता हूँ | निपतितः | – | गिरा हुआ |
| अटवी | – | जङ्गल | परावृत्य | – | लौटकर |
| अभिषेक्तुम् | – | अभिषेक करने के लिये | विहस्य | – | हँसकर |
| युज्यते | – | उचित होता है | प्रत्ययः | – | विश्वास |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) हस्ती कुत्र निपतितः ?

(ख) प्रथमं कं विन्देत् ?

(ग) हस्तिनः नाम किमासीत् ?

(घ) राज्ञा विना किं न युक्तम् ?

(ङ) शृगालेन कुत्र गच्छता हस्ती हतः ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) वृद्धशृगालेन किं प्रतिज्ञातम् ?

(ख) शृगालेन विहस्य किमुक्तम् ?

(ग) केन विना अवस्थातुं न युक्तम् ?

(घ) शृगालैः कः भक्षितः ?

(ङ) कर्पूरतिलकः केन लोभेन गच्छति?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) भुवि कीदृशः स्वामी युज्यते ?

(ख) पङ्के निमग्नः हस्ती शृगालेन किमुक्तः ?

### (4) उचितैः शब्दैः रिक्तस्थानानि पूरयत –

(पशुभिर्मिलित्वा, म्रिये, प्रथमं, लोकेऽस्मिन्, यच्छक्यं)

(क) पङ्के निपतितोऽहं . . . . . . . . . . . . . .।

(ख) सर्वैः वनवासिभिः . . . . . . . . . . . . . . भवत्सकाशं प्रस्थापितः।

(ग) राजन्यसति . . . . . . . . . . . . . . कुतो भार्या कुतो धनम्।

(घ) उपायेन हि . . . . . . . . . . . . . . न तच्छक्यं पराक्रमैः।

(ङ) राजानं . . . . . . . . . . . . . . विन्देत्।

### (5) उचितमेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | कर्पूरतिलकः | भोजनम् |
| (ख) | वृद्धश्रृगालेन | हस्ती |
| (ग) | हस्तिदेहेन | प्रतिज्ञातम् |
| (घ) | महापङ्के | हस्तीभक्षितः |
| (ङ) | श्रृगालैः | निमग्नः |

### (6) निम्नलिखितशब्दानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत –

**उदाहरणं यथा–**

**श्रृगालैर्भक्षितः – श्रृगालैः + भक्षितः = विसर्गसन्धिः**

(क) चोक्तम् - - - - - - - + - - - - - - - = - - - - - - - ।

(ख) ततस्तेन - - - - - - - + - - - - - - - = - - - - - - - ।

(ग) सर्वैर्वनवासिभिः - - - - - - - + - - - - - - - = - - - - - - - ।

(घ) तत्रैकेन - - - - - - - + - - - - - - - = - - - - - - - ।

(ङ) ततोऽसौ - - - - - - - + - - - - - - - = - - - - - - - ।

(च) यद्ययम् - - - - - - - + - - - - - - - = - - - - - - - ।

## (7) क्रियापदानां धातुं लकारं वचनं पुरुषं च लिखत –

| | क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | विन्देत् | | | | |
| (ख) | म्रिये | | | | |
| (ग) | पश्य | | | | |
| (घ) | भविष्यसि | | | | |
| (ङ) | पतिष्यसि | | | | |

## (8) अधोलिखितशब्दानां विभक्तिं वचनञ्च लिखत –

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | श्रृगालेन | | |
| (ख) | मम | | |
| (ग) | पशुभिः | | |
| (घ) | पङ्के | | |
| (ङ) | अस्मिन् | | |

## (9) अधोलिखितैः अव्ययैः वाक्यनिर्माणं कुरुत –

(क) विना . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ख) कुतः. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ग) इति . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(घ) न . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ङ) ततः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

## (10) अधोलिखितशब्दानां धातुं प्रत्ययञ्च पृथक् कुरुत –

(क) भक्षितः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ख) कृतः . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ग) कृत्वा . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(घ) प्रणम्य . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

(ङ) गत्वा . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

### योग्यताविस्तारः –

- हितोपदेशस्य अन्याः कथाः अन्वेषयत पठत च।

❖ ❖ ❖